ॐ

श्री शिवनिर्वाणशतकम्

सत्यं शिवं सुन्दरम्

रचयिता :-

जगन्नाथ रिवू शास्त्री

भट्टयार, आलीकदल, श्रीनगर

काश्मीर

सर्वाधिकारः सुरक्षितः—लेखकस्य

प्रथमावतरण १९७५ - ७६

५५०

मूल्य : पांच रुपये

प्रकाशक :-

अवतार कृष्ण रिवू
एम० ए० संस्कृत
एम० ए० हिन्दी
बी० एड० मुख्याध्यापक बाहथोरा

स्थायी पता :
भट्टयार आलीकदल
श्रीनगर (२)
काश्मीर

मुद्रक :-

नरेश आर्ट प्रेस, जम्मू

(अस्य पुस्तकस्य प्रकाशनार्थं जम्मू काश्मीर साहित्याकादेमीत
आर्थिकानुदानेनानुगृहीतोऽस्ति लेखकः)

[भूमिका]

श्रूयते

विषय सूची

" श्री शिवनिर्वाणशतकम् "

विषय	पृष्ठ
भूमिका	१
प्राक्कथनम्	२
विनायकवल्लभा	३
मङ्गलाचरणम्	५
शिवनिर्वाणम्	६
नवदुर्गास्त्रोत्रम्	२२
रामसुकुञ्जगामिनी	२४

रसास्वादमवश्यं करिष्यन्तीति। येन मदीयपरिश्रमस्य कृतार्थता भविष्यति । विदुषां मनोविनोदः संतोषश्च जायते ।

—जगत् रविः

सर्वाधिकारः सुरक्षितः—लेखकस्य

प्रथमावतरण १९७५ - ७६

५५०

(अस्य पुस्तकस्य प्रकाशनार्थं जम्मू काश्मीर साहित्याकादेमीत
आर्थिकानुदानेनानुगृहीतोऽस्ति लेखकः)

[भूमिका]

श्रूयते

पुरा किल काबुलदेशनिवासिभिः पठान (खां) शासकैः कश्मीरदेशे राज्यं कृतम् । तस्मिन्नेव कालेऽस्यां कश्मीर-वाटिकायां तूलमूलग्रामान्तर्गतश्रीमहाराज्ञ्यः पादमूले स्वर्गीयो लभीजीवाख्यस्तपस्त्यागमूर्तिर्महायोगी तपश्चकार ।

तस्य शिष्यः स्वर्गीयो गोविन्दजीवाख्यो रजगरीजात्यंकितः श्रीनगरान्तर्गतपुरुषयारनिवासी कोऽपि गृहस्थी बभूव ।

स पठानशासकैः स्वराज्यकार्यसंचालनाय काबुल प्रदेशं नीत्वा तत्र प्रधानमन्त्रिपदे नियुक्तः ।

काबुलशासकैः केनाप्यपराधेन तत्र स अन्धकूपे निपातितः ।

अन्धकूपनिपतितोऽसौ गोविन्दजीवो घोरां विपत्तिं गतः सन् स्वं गुरुं लभीजीवं सस्मार ।

स्वगुरुकृपया कश्मीरभाषायां शिवशंकर भवभयहरहरलगयो चरणन्" एषा शिवनिर्वाणस्तुतिस्तस्य वैखर्यां प्रादुरासीत् ।

स्वगुरुकृपया स पठानशासकैस्तस्मादन्धकूपान्निष्कासितः ।

द्वाविंशतिपद्यात्मकोयं "शिवनिर्वाणप्रदो दुःखशोक संतापहरो निबन्धो मया संस्कृतपद्येषु ' भुजङ्गप्रयातं छन्दसानूदितः ।

यद्यपि निबन्धोऽयं त्रुटिबाहुल्याद्विदुषां समीपे मम मन्द प्रज्ञत्वं सूचयति तथापि महानुभावा विद्वांसो मदीयत्रुटिषु ध्यानमदत्वा केवलं मदीयचाञ्चल्यपूर्णमानसिकमर्कटोत्प्लवं गताया रसास्वादमवश्यं करिष्यन्तीति । येन मदीयपरिश्रमस्य कृतार्थता भविष्यति । विदुषां मनोविनोदः संतोषश्च जायते ।

—जगत् रविः

प्राक्कथनम्

भारतवर्षे संस्कृतभाषा वाङ्मयमतीव समृद्धमस्ति तत एव प्राक्तनायां तत्तद्देशभाषा भक्तै: सुजनै: संस्कृतवाङ्मयवाटिकापुष्पभूतानां केषांचित् शास्त्राणां स्वस्वदेशभाषायामनुवादस्तत्र कृत:। तैश्चानुवादै: सा सा देशभाषा समृद्धिं प्राप्ता।

सन्ति देशभाषास्वपि तथाविधानि रहस्यवादादिभरितानि काव्यानि यथाविधानि संस्कृतवाङ्मये नेदानीं लभ्यन्ते।

ततो वर्तमाने युगे देशभाषा वाङ्मयस्यसंस्कृतभाषायामनुवादकरणं प्रति विदुषां प्रवृत्तिर्जाता।

महाराष्ट्रभाषाकाव्यानां संस्कृतानुवाद: प्राय: संस्कृतपत्रिकासु प्रकाश्यन्ते। स्वतन्त्रग्रन्थरूपतयापि केषांचित् तेषां काव्यानां मुद्रणं प्रकाशनं च सम्पन्नम्।

प्रस्तुते च ग्रन्थे श्रीमद्भिर्जगन्नाथरिवूशास्त्रिभि: काश्मीर भाषावाङ्मयस्य कासांचित्सुन्दराणां रचनानामनुवादं विद्वद्भि: संस्कृतभाषायां च वर्तमाने युगे प्रसिद्धान् भावाननुसृत्य नूतनाकाव्यरचनाश्च कुर्वद्भिर्महतीमहिमामयी सेवा क्रियते संस्कृतवाच:। यत्नोऽयमेतेषां शास्त्रिमहोदयानां सफल: स्यादित्याशास्महे वयम्।

लोकाश्चापि यत्नमेतेषां प्रशंसन्त्वभिनन्दन्तु चेति प्रार्थयाम:।
तदित्थमभिनवै: प्रकारै: संस्कृतवाग्देवताया: पूजां कुर्वन्त: श्रीजगन्नाथशास्त्रिण: सत्यं सुधन्या:

श्रीनगरी
२९-७-१९७१

डा० बलजिन्नाथ पण्डित:
शास्त्री एम० ए० एम० ओ० एल०
पी० एच० डी०

ॐ

विनायक वल्लभा

ॐ विश्वं व्याप्य स्थितो यः सुरवरगुरुणाम्यर्चितोब्रह्मणाद्ये
सृष्टेः संस्थापनार्थं विविधमुनिवरैः पूजितो योगसिद्ध्यै ।
दाता सर्वाः समृद्धोर्हरिहरनमितः पार्वतीप्राणभूतो
हेरम्बः पातु सोऽस्मान्द्विपवरवदनः सिंहयुग्माधिरूढः ॥१॥

यो विश्वात्मा प्रणववपुषालंकरोतीह शुण्डं
पूर्णाहन्तां वहति स बहिर्वारणेन्द्रस्य रूपात् ।
कूटाहन्तां नयति विलयं मूषकस्याधिरूढो
विश्वामोदं वहति च करे मोदकैः पूर्णपात्रम् ।२॥

विघ्नान् हतुं वहति सुकरे सूक्ष्मविद्याकुठार
मातमस्थं तं स्मरति पुरुष चाक्षमाला निवेशात् ।
हस्ते दन्तं वहति विमलं लेखनी ग्रन्थनाय
सो नः पायाच्छिवपदरतः सृष्टिबीजो गणेशः ।३।

रागद्वेषं हरति सहसा यज्ञसूत्रद्विजिह्वं
भालि बालं श्रयति च विधुं मानसोनिर्मलत्वम् ।
भ्रूमध्ये यद् वहति नयनं ज्ञानविज्ञानबीजं
पायान्नोऽसौ शशिशकलधृक् पार्वतीशान सूनुः ॥४।

यं पूजादौ श्रयति विभवं पूजकः पूजयित्वा
योगज्ञा यं हृदयकमले ध्यानगम्यं स्मरन्ति
वामे भागे वहति सततं वल्लभाँ यः स्वकीयां
भूयोभूयः सकलजगतां तं सुनाथं नमामि ।५।

स्मारं स्मारं प्रणववपुषं चैकदन्तं शरण्यं
ध्याय ध्यायं प्रकटसवितुर्व्योम्निदेवस्य भर्गः
यन्नो ध्येयं गुरुवर मुखाच्चोदनाद्वै वरेण्यं
तत्सद् ध्याये हृदयकमले बोधरूपं स्वरूपम् ॥६॥

सुरभिमधुरां झंकारैर्यः सदा सुमनः प्रियां
सुभगपुरुषो गायन् रागैर्मधोरिव षट्पदीम् ।
मधुप इव वं कृष्णां मूर्ति दधत् कमलाश्रियां
हृदयकमले देवं ध्यात्वा समाश्रयति श्रियम् ॥७॥

—:०:—

जगन्नाथ कृता सैषा विनायक युगे रवौ
विक्रमे नवखविंशे शुक्ले सिंहे रवौ गते। ८॥

(१) प्रथम श्लोकस्य टिप्पणी—

रभि धातोः नुम् विधानात् रम्भ इति सिद्धिः । हे रम्भः शब्दब्रह्मरूपः । प्रणवः परंब्रह्म ।

सिंहयुग्भाधिरूढ़ः ॥
प्राणपानसञ्ज्ञौ द्वौ सिंहौ
ययोर्निग्रहः सिंहनिग्रहतुल्यः ॥

समाप्तम् !

—जगत् रविः

ॐ

मङ्गलाचरणम्

(क)

संस्कृत

श्री: शारदाब्जनयना शरदिन्दुशुभ्रा
भासा स्वया हरतु नो हृदयान्धकारम् ।
या मौलिभि: सुरवरैर्विहितप्रणामा
ज्ञानार्थिभिर्मुनिवरै: सततं विचार्या ।।१।।

प्रपन्नपारिजाताय - ज्ञानमुद्राक्षपाणये ।
जगत् कल्याणसक्ताय नम: शान्ताय तेजसे ।।२।।

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ।।३।।

★★

संस्कृत

(क)

१ नमामीशमीशाननिर्वाणरूपं - शिवं शंकरं जन्ममृत्योर्भयादीन् ।
हरं शापपापे भवं सच्चरित्रं-सदा सद्गुरोः पादपद्मं भजेऽहम् ॥१॥

२ तदीयं सदा पादपद्मं शरण्यं - वरेण्यं वदान्यं वराणां प्रदं च ।
मलं स्वान्तज यन्निहन्ति स्मृतं तत्करस्यावलम्बं सदा मे करोतु ॥२॥

यमस्यापि भीतिं हरेद्याहिप्रीत्या, सदा जन्ममृत्योर्भयं चापि हन्ति ।
नमस्येऽमरेशं भजे तस्य पादौ, जगत्पालकःपालनं मे करोतु ॥३॥

जगन्कालहर्ता भवेत्तस्यपादः सदा भेदशून्यस्तदीयं चरित्रम् ।
पवित्रं स्वदृष्टेः पथिस्थ करोमि-नमामीशमीशाननिर्वाणरूपम् ॥४॥

३ प्रभोदीनबन्धो भवान् द्वतहीनो, दयां देव दीनाय मह्य करोतु ।
स्मरिष्ये त्वदीयं चरित्रं सदाहं, गमिष्यामि शम्भो पदं ते हसञ्च । ५ ।

मदोयान्विरावान् तथा दोनवाच, श्रृणु त्व स्वकर्णेन हे दीनबन्धो !
भय मे शरीरे महञ्जर्णताया, भवेत्तन्न जोर्णं प्रभोत्वत्प्रसादात् ।६।

अहं मोहमग्नो भवान्मोहहर्ता, महामोहनिद्रा यथा पूर्वकाले ।
मुनीनां प्रनष्टा तथेयं त्वदोया, त्वप्रसादाद्विनाशं स्वयं मे प्रयातु ॥७॥

मनस्तुष्टिदं देहपुष्टिप्रदं च, भजे देवजुष्टं भजे दुर्जनघ्नम् ।
अहं तं महेशं वदान्यं शरण्यं, भजे शान्तिदं स्वं शरीरं समर्प्य ।८॥

कश्मीरी

क)

१ शिव शकर भवभयहर, हर लगयो चरितन् ।
गुर लगयो पादकमलन, सत् गुर लगयो चरणन् ॥१॥

२ चरणन् तल वार वरतम्, वरदा छुक शरणन् ।
शरणूय् च्य आसय कासतम्, मलम्य अन्तः करणन् ॥
कर शकर कर रटहम्, कर अर हर मरनन् ।
मर मर छुम ज्यनमरनुक्, अमरेश्वर भगवन् ॥
पाद कमलन् नलम्य पालतम्, पालवुन् छुक् कालहन् ।
हन्य हन्य चूय शिववुछहथ, यव दूय गल्य हन् हन् ॥
शिव ....

३ दय अहय दय म्य गच्छतम्, कर दय दय निशदिन ।
दीनदयाल कनम्य थावतम, दीनवचनन् त वदनन् ।
जर जर छुम जुजरनकुय, जीरनावतम् मत हन् ।
हननावन हननावतम् , मन्यमोहयुथ मुनियन् ।
देह पुष्ट मन तुष्टथावतम् , देवजुष्ट छुक् दुष्टहन् ।
पानै ईश्वर पानै तोषतम् , पानवन्दयो तोषनन् ॥
शिव ....

कश्मीरी

(ख)

४ अन्त कुस जान्य च्य अनन्तस्, सन्त व्यसरेय चिन्तनन् ।
क्या निश्चय करि वेदान्ती, यति वेद लग्य पन्थनन् ।

ब्रह्मादिक् गयमोहस, तत्व च्युन क्या व्यजरन् ।
तत्पुरुष चूय सत् म्य भासतम्; वथ म्य हावतम् जाननूच्य ।

गथ छय सिद्ध शुद्धमुनियन्, सथ छम शापमोचनन् ॥
शापमोचन ज्ञानलोचन, पार्य आर्या लोचनन् ।

शिव ....

५ तेजोरूप तेजूय चूय छोक, सोम सूर्यत अग्नय ।
तेजोरूप तेजूय चू भासान, बाह्य अन्तर् योगोयन् ।

स्वप्रकाश स्वानुभव गम्य्, शान्त तेजूय् ज्ञानीयन् ॥
शिव म्यति दित कर्म सुम स्यज, जान यूछ जनकादिकन् ।

जान जानुन जाननीय चूय, क्याह भुजान च्यान्य जान्यविन् ॥
ज्ञान उपदेश वारवरतम्, फर अज्ञान पलटन् ॥

शिव...........

६ निष्कारण सर्वकारण, चूय कारण कारणन् ।
त्रिकार छुक् चूय् कारण, सृष्ट स्थित तय प्रलयन् ।

चूय् कर्ता चूय भर्ता, चूय हर्ता जगतन् ।
व्याप्य व्यापक भाव व्यापीत्, चूय निरन्तर भवनन् ।

भजि क्याह वन चूजि क्या छुक्, योस न जोन कांसि जान्य व्यन् ।
जान सारूय च्यान्य दया, चान्य कृपा भगवन् ॥

शिव........

संस्कृत

(ख)

४ अनन्तस्य पारं बभूवुर्न सन्ताः, परास्ता भवन्तीह सर्वेविचिन्त्य।
स वेदान्तविन्निश्चयं किं नु कुर्याद् भवन्तीह वेदाः सदा मार्गशान्ताः ॥९॥

गतो मोहजाले विरिञ्चिः सदेवैः कथं ते वदेयुः स तत्सत्स्वरूपम् ।
सदा भातु मेऽन्तः स तत्सत्स्वरूपः, स मे ज्ञानमार्गं प्रशस्तं करोतु ॥१०॥

मुनीनां स्वसिद्धाः सदा शुद्धमार्गाः, प्रभश्शापहर्ता भवेन्निश्चयो मे ।
सदा शापमुक्तिप्रदाँ ज्ञानदां तां, नमाम्यार्यदृष्टिं स्वदेहं समर्प्य ॥११॥

५ स तेजः स्वरूपः स्वयं ज्योतिराख्यः, स सोमाग्निसूर्यादिरूपैर्विभाति।
स्वभावानुगम्यः प्रकाशस्वरूपः स्वतेजो बभौ ज्ञानिनां हृद्बिले सः ॥१२॥

स भाति स्वयं योगिनां हृद्गुहास्थः, स तेजोवरेण्यः स्वयं मे विभातु।
ऋजुं देव! मे त्वं स्वकर्मादिसेतुं, कुरुज्ञानगम्यं विदेहस्य यद्वत् ॥१३॥

भवाँञ् ज्ञानरूपः सदा ज्ञेयविज्ञौ, तव ज्ञानदृष्टेर्विना किं नु जाने ।
भवेऽस्मिन्स्वज्ञानोपदेशं प्रशाधि, कुरु त्वं ममाज्ञाननाशं सदैव ।१४।

६ त्रिधा कारणानां सदा कारणं त्वं, स्थितः कारणाच्च विमुक्तो विभासि।
त्रिधा सस्थितैः कारणैस्त्वं करोषि, जगत्सृष्टिरक्षेलयं चैव नित्यम् ॥१५॥

जगत्कार्यकर्ता स्वयं लोकभर्ता, जगद्भारहर्ता त्वमेव त्वमेव।
स्वयं व्याप्य भावान् अखण्डः स्थितस्त्वं-स्वयं भूर्भुवः स्वः स्वयं व्यापकस्त्वम् १६

अहं किं वदेयं भवान्कोऽस्ति देवो, जनैर्ज्ञानहीनैर्न ज्ञातस्वरूपः ।
दया ते कृपा ते स्वरूपप्रतिष्ठा, भवेऽस्मिन्भवेन्मे प्रभो! ज्ञाननिष्ठा ।१७।

संस्कृत

(ग)

७ प्रभो ! सत्यमूर्ते ! सुरैः पूजितस्त्वमहं पूजनीयां विधिं चावलंब्य
समर्चे भवन्तं सदा सत्यभावैर्यथा पूजितो विष्णुना पूर्वकाले ।१८।

कदा केसरैः पद्मपुष्पैः प्रफुल्लैरहं भावपुष्पैश्चमालां करिष्ये ।
तथा सन्मनोभावयुक्तं सपत्रं, शिरोभूषणं ते करिष्ये सुगुच्छम् ॥१९॥

सुहृद्भावविश्वासयुक्तैः सुपुष्पै रहं पादपद्मं समर्चे त्वदीयम् ।
स्वपादस्य मूले प्रभो! पालय मां, हरन्विघ्नसङ्घान् तथा शापपापे ।२०॥

८ शिवो निर्मलश्शुद्धबुद्धः पवित्रो, मनश्शुद्धिदो ध्यानगम्यो महीयान् ।
सदा स्फाटिकाभं भवेत्तस्य भक्त्या मनो मे विकासं भवेदीशमूर्त्या २१॥

तमोरूपकं वासुकिं यो दधान. श्चिदात्माशिवो नीलकण्ठः स पातु ।
सुधाधारया गगया शोभते यो, यया तारिता पातकाद् भारतीयाः ॥२२॥

शिवा वामभागे बभौ चेतनस्य स्वचिच्छक्तिरूपा स्वयं भासमाना ।
वृषो धर्मरूपस्त्रिशूलः करे योऽप्यवस्थात्रयस्य व्यवस्थां करोति ॥२३॥

९ तनौश्वेतभस्माङ्गरागः ससत्वो, गुणश्शीतसौन्दर्ययुक्तो विभाति ।
गले रुण्डमाला धृता निग्रहाय, तथा स्वेन्द्रियाणां मनोजस्य शान्त्यै ।२४

जटा राजते देवदेवस्य मौलौ, रजो व्याजबद्धो मदीयो विचारः ।
मनश्शुद्धतां यो ललाटे व्यनक्ति, स चन्द्रस्तमस्तापहर्ता जनानाम् ।२५।

स दिग् वस्त्रधारी स निर्वासनानां, वसन्यः सदा मानसे सज्जनानाम् ।
त्रिधा संस्थितैः कारणैः स त्रिनेत्रस्त्रिधाम्नि स्वयं राजते ज्ञानबुद्ध्योः ।२६।

कश्मीरी

(ग)

७ देव पुज छुक देवपूजनी. पूजा व्यध पूजनन् ।
विजि विजि वूज़ि पज़ि पूजहथ, युथ पूज़नख विष्णन् ॥
भाव. वामन फुलनाविथ, माल. करहय कौसमन् ।
बो सु मन्य व्यन. लागहय, भ्ययि गुन्य करहय कौमदन् ।
सोबुन्धि यछि़ पछि़ हन्य पोष, लागहय पादकमलन् ।
पादकमलन तल म्य पालतम्, तल ह्यथ क्यथ विघ्नन ॥

शिव ....

८ शुद्ध निर्मल शिव. पूजहथ, यव. सपन्यम शुद्ध मन ।
शुद्ध मन च्युन ध्यान धारिथ शुद्ध स्फाटिक व्यकसन् ।
नीलकण्ठस हटि वासुक, चित् आत्मस् तमूगुण ।
सुधा धारा गंग ह्यरि शेरि, तारवून्य सुज़ि नरक़न् ।
शिवा धार्मूच् वाम.भागस्, चित् शक्त चित् आत्मन् ।
धर्म वृषभ वगि त्रिशूल, त्रि अवस्था अथि सन् ।

शिव........

९ शीत सुन्दर छुत भस्मा, तन्य प्रकट्योय सुतू गुण ।
रुंडमाला गलय गंड मूच्, रूप कुरमुत इन्द्रियन् ।
क्याह छु जटा मुकट शूभान्, छ्लू गुण्डमुत रजूगुन ।
ट्यकि शायि ड्यकि चन्द्रम, प्रकट्योय चोन शुद्ध मन ।
दिक् वासन निर्वासन, वास च्योन मन्य सुमनन् ।
त्रि धाम छुक ज्ञान बुज़तय, त्रिकार रूप त्रिनयन ।

शिव........

कश्मीरी

(घ)

१० मायातीत माया चान्य, त्रिगुण सूत्य व्यकसन् ।
निर्गुण छुक गुण उल्लङ्घित, माया गुण विलसन् ।
भूत. भावत भूत. पञ्चक, दीह खर. कुर अहमन् ।
दह इन्द्रिय मन त बुद्ध ह् यथ. प्राणबल सूत्य प्रचरन् ।
सत् चित् आनन्दरूप आत्मन्, जीवभाव. सूत्य कुर शयन् ।
तादातमभाव. देह के लूभ, प्राकृतबल जीवनन् ॥
शिव... ...

११ मोहज़ाल् सूत्य जीव गण्डनै, आव कर्मन्यन बन्धनन् ।
काम क्रोधन स्थित रूटनस्, प्यठ मनस् बुज़ त. इन्द्रियन ।
द्वन्द्वभावत रागद्वेष. सूत्य, कापि लुग षट् शत्रन् ।
गुण सङ्गसूत्य इत. गछिलुग् पुण्य पापवश बन्धिज़न् ।
मुकूचारुक पाय चूय शिव, मोक्षदा छुक् भक्तिन् ।
भवबन्धन. मुकूलावतम्, छुक चूय भवभयहन् ।
शिव... ...

निष्प्रपच. च्योन सोरुय प्रपञ्च, वांञ्छ छ्यम कस भरूकन ।
हे हरी ! हरू ! विरिञ्चि ! बोज़तम, क्याह वनू पञ्चदैवतन ।
वन चू क्याह कर चञ्चल मन, संसारूक्यन क्षेंचलन ।
पञ्चवदन मुकलावतम्. केंह उपाय छुम न च्याञ्नि विन ।
कूनू कूनू कूनू कुननुय तोषतम्. केंह अन्त छुनू हेरि बुन ।
रूतिमुख. सुखूमुखूवरतम् , मुखूसुन्दर दुःखूहन् ! ।
शिव ... ...

संस्कृत

(घ)

१० स मायामतीतो गुणैर्यस्यमाया, विकासं प्रयाता त्रिभिर्निर्गुणश्च ।
स मायागुणैः कीडति क्रीडनस्थो विकासं गतोऽसौ स्वयं कर्मनिष्ठः ॥२७॥

मनोबुद्ध्यहंकारयुक्ते शरीरे, सदा पञ्चभूतेन्द्रियप्राणसङ्घे ।
स्वयं भूतनाथः सदानन्दरूपश्चिदात्मा गतो जीवभावं महेशः ॥२८॥

स जीवो बलं प्राकृतं प्राप्य देहे, प्रलोभात्स्वदेहस्य जीवात्मभावम् ।
प्रयातो महामोहनिद्रां तदात्मा, स्वयं यो महीयान् स्वयं विश्वमूर्तिः ॥२९॥

११ स्वयं मोहजालस्य पाशं प्रसार्य, निबद्धो निजैः कर्मबन्धैः स जीवः ।
हृदि क्रोधलोभेन्धनैः कामवह्निः, प्रदीप्तः प्रचण्डो ध्रुवं मोहसक्तः ॥३०॥

मनोबुद्धिचित्तेन्द्रियेषु स्थितिं सो, गतश्चेद् भवेद्रागवैरादिकानाम् ।
रिपूणां वशे पञ्जरस्थः सजीवो, गुणानां प्रसङ्गाद्वशाज्जन्ममृत्योः ।३१॥

करोत्यागतं स गतं चैव लोके, स्वयं पुण्यपापौघजालं प्रसार्य ।
शिवः केवलो मुक्त्युपायो जनानां, स मोक्षप्रदाता सदा भक्तिमद्भ्यः ।३२॥

स मे मोक्षदाता स मे भीतिहर्ता, शिवः केवलोऽसौ शिवः केवलोऽसौ ।
स्वयं राजतेऽसौ सदा राजहंसो, विराड् विश्वभुग् विश्वपो विश्वकर्ता ।३३॥

१२ विरिञ्चे! हरे! शंकर! श्रूयतां मे, प्रपञ्चादतीतः स्थितस्त्वं प्रपञ्चे ।
स्ववाञ्छा प्रजागर्ति मे भावगा या, त्वहं कर्णगां कं करिष्ये त्वदन्यम् ।३४॥

त्वया पञ्चवक्त्रेण मुक्तिर्विना न, भवेज्जन्मजन्मंरतः तुष्यतात्माम् ।
मदीये शरीरे स्थिता पञ्चदेवा, वदिष्यामि किं तान्वद त्वं स्वयं हे ३५।

मदीयं मनश्चञ्चलं याति दूरं, महाघोरसंसारविघ्नाभिभूतम् ।
अनन्तस्य नाप्ता सुरैश्चापिसीमोपरिष्टादधस्तात्तथा सर्वतश्च ॥३६॥

तमेकं भजेऽहं सदा सुन्दरो यः, स मे दुःखहर्ता वरेण्यो वदान्यः ।
स्वयं भूतनाथो गणानां प्रणेता, सदा मे शरण्यो महाभूतिदोऽस्तु ॥३७॥

संस्कृत

(ङ)

१३ समृद्‌ध प्रभो मे समां देहि येन, सदा संयमेनैव कालं नयेयम् ।
अवक्रा भवेत्तस्य कर्मस्यरेखा, समा चेद्दया स्यात्त्वदीया नरस्य ॥३८॥

गुणानां प्रसङ्गैस्तथा साधनैः सः, समाप्नोति सोमाद्रसं संग्रहीतम् ।
सदाहारयुक्तो विहारे समो यस्तथा स्वप्नजाग्रत्सुषुप्तेषु चैव ॥३९॥

स्थितो यः समायां स्वभावानुकूलो, धरायां समाविश्य योगी समाधिम् ।
स्वयं प्राप्नुयात्सद्‌गुरोर्वाक्ययोगात्समारूढयोगो भवेत्स महात्मा ॥४०॥

१४ स्वभक्तप्रियस्त्वं स्वभक्तिप्रदश्च, त्वमिच्छां स्वभक्तस्य नित्यं करोषि ।
स भक्तः स्वभक्तिं स्वभावं समर्प्य, त्वदीयां सपर्यां सदैव करोति ॥४१॥

स्वभक्तेश्छलेन स्वभक्तेर्बलेन, स्वयं स्वेन्द्रियार्थाञ्जयेद्वै मनीषी ।
सदाश्रद्धया यस्तव ध्यानमग्नो, मनः प्राणबुद्‌धीन्द्रियाणि प्रधार्य ॥४२॥

यमादीञ्छमादीन्स्वयं पालयित्वा, स्मरेद् यः सदा देवदेवं हृदब्जे ।
विदित्वा स सत्यं मनश्चैवजित्वा, पुनः सर्वलोकान्स गच्छेद्विजित्य ॥४३॥

१५ निवृत्तिं गतं यस्य संसारसिन्धो, मनश्चेद्धनैर्धान्यसंपत्तिवान्सः ।
उदासीनवत्कर्मभोगान्समश्नन्नसक्ता भवेत्तस्यबुद्धिर्गृहस्थे ॥४४॥

बहिःरागवान्सर्वकार्येष्वसक्तः, सदान्तर्विरक्तः पुनर्जन्ममुक्तौ ।
परित्यक्तकामो मुनिः सिंहतुल्यः, स संसारसिन्धो र्भवेत्पारगोऽत्र ॥४५॥

कश्मीरी

(ङ)

१३ सम दितम संपदा यव - सुम रोज़हा समयन ।
सम यस गच्छि च्यान्य दया लगि सुभ सिज कर्मन् ।
सम्य सोमरस प्रथगुण किन्य, समयन तय साधनन ।
सुम आहार सुम व्यवहार, सुम निद्रा त जागरन् ।
संभालिथ पानस सुम, सुम गुज़रिथ शायिहन ।
लगि समाध योग सुम्य सिज, विजि सत् गुर वचनन् ॥
शिव........

१४ भक्तप्रिय भक्तिदायक दयि युस यछहन भक्तिजन ।
भक्तिभावत भक्तिभावनायि, च्ययकुन लगि निशिदिन ।
भक्तवत्सल भक्तिछलबल, बल फेरि गुड विषयन ।
दरिश्रद्धायि ध्यानधारिथ, रटि प्राणबुद्धचित् त मन ।
यम नियम शम दम किन्य, स्वरिसुय दय क्षण. क्षण
मन ज़ीनिथ पुज़ चीनिथ, गछि जीनिथ भवनन् ।
शिव ......

१५ यस संसृति प त्य अचि मन, सुस्त आस्यतन विभवन ।
लोर् आसि न अन्न धनसय, घरबारस त सन्ततन ।
व्यवहार. च्यन काम्यन प्यठ, परद्यन ह्.ज. कामि जन ।
प्रारब्धुक भोग भोगान, भोगवुन जन स्वप्नन ।
रागी जन सार्य सय सूत्य, त्यागी सर्वकामनन् ।
गछि संसार सरतरिथ, लडकरवोन सूहजन ॥
शिव......

कश्मीरी

(च)

१६ युद वै कांसि ओरै यिय मंग-संग मेलिस साधुज़न ।
साधुज़न युस सम्य चित्त सूत्य, ममताय निश आस्य भ्युन ।
भ्युन रुत कुत द्वन्द्वभावत, छ्यन दित सर्व कामनन ।
शम दम ज्ञान विज्ञान सुस्त, रुस्त कपटन त कल्पनन ।
ब्रह्म तत्पर आसि आस्यस, परेहट सर्व विषयन ।
वुड दुर्लभ ब्रह्मरूपत्युथ, लभ्यजुव ह्यू साधुज़न ।।
शिव...... .

१७ युस कोह यछि पानस रुत. कुत आवि प्रावि शुध.मन ।
शुध.मन भक्ति भावनायि गुण, कन थावि साधु व.चनन ।
साधु व.चनव प्रावि ज़ाग्रत्, जाग्य ज़ाग ह्यथ समयन ।
समय वात्यस शम. दम नियम,. पानै तार्थ तस मुच़रन् ।
दीन दयाल. हे कृपाल, कांसि गथ छ्यन च्यजि व्यन ।
सत्भाव. छ्यम सत् चानी, सत् गत दिम भगवन् ।
शिव.........

१८ त्यलि च.यूनुम भुजि क्याह छुस, यलि वाचम .चेनवन ।
.चेनन. आयम दया .चान्य, .चेननावान सेवकन ।
भक्त युदवै मुक्त थावहन, मुक्त छुस निष्बन्धन ।
स्व प्रकाश त. अविनाशी, माशविथ .ज्यन. मरनन ।
सत् चिदानन्दरूपसस्थित, न्यथ ह्यथ निर्गुण गण ।
पज़ दया च्यान्य सार सारूय, करि क्याह म्यान्य वन वन ।
शिव.........

सस्कृत

च)

६ कृपादृष्टिपात्रो भवेद्यः सुभक्तः, सुभाग्यैर्भवेत्साधुभिस्तस्य सङ्गम्।
शुभाद्योऽशुभाद्द्वन्द्वभावाद् विमुक्तः, परित्यक्तदम्भो विकल्पैर्विहीनः।४६।

तथा ज्ञानविज्ञानयुक्तो मुनीन्द्र, शमे वै दमे प्राप्तसर्वाधिकारः।
सदा ब्रह्मलीनः परित्यक्तकामः, समाप्नोति सो जीवने ब्रह्मरूपम् ।।४७।।

यथा ब्रह्मरूपो लभीजीव संज्ञः, समाधिं गतः पादमूले भवान्याः।
स्वयं शक्तिमान् स. स्वयं भक्तिमान् सः, चिदानन्द रूपश्शिवः पातु मां सः।४८।

७ निजात्मा प्रियो यस्य चेत्स्याद्भवेऽस्मिन्मनस्थं कुतर्कं त्यजेच्छुद्धभावैः।
तमासाद्य देवं सुभक्त्या समर्चेत्, स्वकर्णौ नयेतां स्वयं साधुवाक्षु ।।४९।।

तदा साधुवाक्यैरवाप्नोति जाग्रदवस्थां स कालस्य कुर्वन्प्रतीक्षाम्।
शमाद्यैर्यमाद्यैर्नियम्य स्वभावं, स्वकालेऽर्गलानां भवेत्तस्य मुक्तिः ।।५०।।

दयालो कृपालो विना ते गतिर्न, सुहृत्सत्यभावं मदीयं विचिन्त्य।
महानाश्रयो मे भव दीनबन्धो !, प्रशस्तं सुमार्गं मदीयं कुरु त्वम् ।।५१।।

८ अहं कस्तदा ज्ञातवान्देवदेव, यदा चेतना मे गता जागृतिं ते।
त्वदीया दया सेवकान्बोधयन्ती, यया बोधितोऽहं स्वयं सेवकस्ते ।।५२।।

यदि त्वं स्वभक्तं विमुक्तं करोषि, तदाहं विमुक्तः सदा बन्धहीनः।
स्वयं त्वं प्रकाशः स्वयं नाशमुक्तः, सदा जन्ममृत्योरतीतस्त्वमेव ।।५३।।

सदा चित्स्वरूपः सदानन्दरूपः, स्थितोनिर्गुणस्त्वं सदा स्वस्वरूपे।
त्वदीया दया यत्र सत्यार्थरूपा, मदीये प्रलापे भवेत्तत्र कोऽर्थः ।।५४।।

संस्कृत

(छ)

१९ सदा शान्तरूपः सदा निर्मलस्त्वं, सदाशा हृदब्जे स्थिता मे त्वदीया
प्रलापाञ्च मे सारयुक्तान् कुरु त्वं, शिव! त्वं स्वदृष्टिं शुभां मे प्रयच्छ ।५५

अभाग्यान् विदास्ये शुभं त्वं स्वनाम्ना, शुभां दृष्टिमेकां प्रयाचे भवन्तम्
प्रदाता शुभानां शुभानां च सारस्त्रिलोकेषु । सौन्दर्ययुक्तः सदा त्वम् ।५६

सुशोभां विधास्ये च ते पुष्पवृष्ट्या, तया ज्ञानसंपद्भवेच्छोभनीया
यया शोभनीया भवन्तीह लोकाः, सुशोभा दया ते भवेत्सा सदा मे ॥५७

२० सदा नाशहीनं पुनर्जन्ममृत्योर्विनाशाय नित्यं भजे तं सुभक्त्या
तदाशा स्थिता पूर्णरूपेण चित्ते, सदाशां सदा पूरयेन्मे दयालुः ॥५८॥

स मृत्योर्मुखान्मे फलस्येव बन्धात्सुपक्वस्य मुक्तिं प्रभुर्मे ददातु ।
तमः स्वप्रकाशं सदा चित्प्रकाशं, भजे नेत्रयोर्ज्ञानदं तं प्रकाशम् ॥५९।

पुनर्जन्ममृत्योर्भयं स्वं निहत्य, तथा वासनानां प्रशान्तिं च नीत्वा।
प्रकाशस्य योऽसावुदेति प्रकाशः, स शान्तः प्रकाशः सदा मे विभातु ।६०।

गुरूणां प्रसादः प्रपूर्णो भवेन्मे, प्रभो! दीनबन्धो! कुरु मां सुपात्रम्
महामोहनिद्राविनाशं करं तं, शिवं शंकरं सद्गुरुं स्वं भजेऽहम् ॥६१॥

२१ भवेऽस्मिन्नसारा सदा लोकयात्रा, धनं पुत्रपौत्रास्तथा भ्रातृवर्गाः ।
गृहं स्त्रीजनो बन्धुवर्गश्च सर्वमसारः सदा भ्रान्तिरूपो विभाति ।६२।

सतृष्णस्य तृष्णा यथा सा मृगस्य, शिव! त्वं मदीयः स्वयं पुत्रपौत्राः
स्वयं भ्रातृबन्धू तथैव कुटम्भः, पिता त्वं च माता गृहस्थे सुसंपत् ।६३।

धनं त्वं च लोके स्थितं यच्च सारं, सहायो भव त्वं सदा मे दयालो ! ।
नमामीशमीशान निर्वाणरूपं, शिवं शंकरं सद्गुरुं स्वं भजेऽहम् ।६४।

कश्मीरी

(छ)

१९ शान्त निर्मल भ्रांत छ्यम चान्य, मानतम सार वन. वन ।
शुभ. दृष्टी शिव. करतम, नाव चोन शुभ. अशुभन ।
शुभ दायक शुभ. दृष्ट चान्य, सार शोभा शोभनन ।
शूभवुन च़य त्रन लूकन, शूभ्रहथ पोषि वर्षणन ।
शूभरावतम ज्ञानसंपदा, शूभ युथ यियि जगतन ।
शूभ सार्‌य चान्य दय, चान्य कृपा भगवन् ।
शिव... —

२० अविनाशे. आशपूरतम, नाश करहा कल्पनन ।
आशापूर. आशा चान्य, आश छम राश पपनन ।
घटि ह्‌न्दि गाश. चित्प्रकाश, गाश अनतम नित्रम ।
माशविथ रोज़. सर्वकल्पनन, नाशविथ. सर्ववासनन ।
प्रकाश. शान्त. प्रकाश च़य, गाशर गाश गाशरन ।
पूरुम प्रेसाद गुरप्रेसाद; करुम. प्रेसाद भगवन् ।
शिव...——

२१ संसार. चीय. छुच आशा, शुर्य मुर्य तह सन्तनत ।
भाय बन्धतय धन. संपथ; गर. बारतय स्त्रीज़न ।
सोरुय असोर भ्रम सोरुय, मृगतृष्णा यिछ़ ज़न ।
शिव. च़य म्योन शुर्य मुर्य तय, भाय बन्ध तय सारोज़न ।
च़्य मोल माज्य च़्य गरबार, च़्य संपत धन द्यार ।
च़्य सोरुय च़्य सारय, सहार रोजतम भगवन् ।
शिव........

कश्मीरी

(ज)

२२ लूभ छुम न वरगण नय हुन्द, क्षोभ ति न भियि नरकुक ।
रुत क्रुत सुख दुख भूगान, फल पनन्यन कर्मन ।
हर नावसूत्य थर अचान, दूरि दूरि यम क्येंकरन ।
शिव भक्त सज़ सहाय छांडान, मायि पनने देवगण ।
अख शुभ दृष्ट शिव करतम, पानै वरतम भगवन ।
शिव शंकर भव भय हर, हर लगयो चरणन ।
गुर लगयो पादकमलन, सत् गुर लगयो चरितन ।।

२३ नव नाथीश्वर च़्य छुक, नव निधान छुक सेवकन ।
नवि खुत नुव-नुव बु बुछिहृथ, लगि नुव-नुव नवनन ।
नव त्रुपुरिथ दह रटिथ, दह प्रणव व्याहरन
दह द्यक् पाल ह्यथ रोज़तम, ईश रुस्त निशि विघ्नन ।
नव दुर्गा करि पक्ष म्योन, युस रक्षक शरणन ।
नव द्वार पुर खस बुफ ह्यथ नव्यसय शिवभवनस ।
शिव शंकर भव भय हर, हर लगयो च़रितन ।
गुर लगयो पादकमलन, सत् गुर लगयो च़रणन ।।

(श्री शिवार्पणमस्तु)

❀ समाप्त ❀

संस्कृत

(ज)

२२ न मे देवलोकस्य लोभो भवेऽस्मिन्न मे पातकस्यापि क्षोभः कदाचित् ।
शुभं वाशुभं यद्भवेत्कर्ममार्गे, स्वकर्मानुसारं फलं तद्भवेन्मे ॥६५॥

सुखस्याथ दुःखस्य भुञ्जे फलं तत्, स्वनाम्ना हरस्य भयाद् यान्ति दूरम् ।
यमस्य स्वयं किंकरास्ते सदैव, शिवस्य स्वभक्तो भवेद् यो महात्मा ॥६६॥

सहायं निजं तस्यदेवाः स्मरन्ति, तदीया शुभा दृष्टिवृष्टिर्भवेच्चेत् ।
महासंपदो लक्षलक्ष्मीः प्रदात्री, भवेत्स्वर्गसोपानमार्गे सहाया ॥६७॥

शिव! त्वं कुरु स्वां स्वदृष्टिं दयार्द्रां, वृणीष्व स्वयं मां प्रभो! दीनबन्धो !।
कृपादृष्टिपातैर्भवेयं सुधन्यः, क्षतिः का भवेत्ते प्रभो! पालने मे ॥६८॥

२३ नवानां च नाथेश्वरस्त्वं मदीयो, नवत्वं निधानानि सत्त्वकाय ।
नवानां निधीनां पतिश्च स्वयं त्वं, नवीनात्सदा नूतनस्त्वं विभासि ॥६९॥

त्वयाहं भवेयं सदैव नवीनो, गृहीत्वा नवद्वारपालान्यथाहम् ।
निग्रह्येन्द्रियार्थान्सदोमुच्चरेयमहं त्वत्स्वरूपे निमग्नो भवेयम् ॥७०॥

दिक् पालवृन्दैर्दशभिर्मुनीन्द्रैर्गन्धर्वविद्याधरसिद्धसङ्घैः ।
स्थितो हृदब्जे भव मे महेश, निघ्नन् मदीयान्बहुविघ्नवृन्दान् ॥७१॥

नवदुर्गा नवधारा, वाहिनीभक्तिसैन्धवी ।
करोतु पक्षपातं मे क्लेशपाशविमोचिनी ॥७२॥

नवद्वारपुरात्सोहमुत्प्लुत्यखगवत्स्वयम् ।
नवनाथेश्वरं प्राप्तुं गमिष्यामि नवां पुरीम् ॥७३॥

संस्कृत

(झ)

२४ खग इव नवभिः संशोभिताद्द्वारमार्गै
र्नवपुरमयदेहात्खे समुत्प्लुत्य यास्ये ।

अभिनवशिवगेहं नागगन्धर्वसिद्धै
र्बहुविधकृतमानः शापपापाच्च मुक्तः ।।७५।

शारदांघ्रिसरोजस्य, मधुपो मधुपः सदा ।
शिवनिर्वाणदां भक्ति जगन्नाथः समाप्नुयात् ।।७५।

सुपदानूदिता सैषा शिवनिर्वाणदायिनी ।
शिवपादमधुपानमनोभ्रमरपद्मिनी ।।७६।।

इदं स्त्रोत्रं महापुण्यं, शापपापविनोचनम् ।
यः पठेत्प्रयतः सोऽन्ते, शिवनिर्वाणमाप्नुयात् ।७७।।

ओं

अथ नवदुर्गा स्त्रोत्रम्

(ञ)

(1) गायत्री :

सच्चित्कला भगवती प्रथमं सुसूक्ष्मा विद्योतते सुकृतिनां हृदये पराख्या ।
भर्गाख्यया सवितृमण्डलमध्यसंस्था सा बुद्धिचोदनपरा भवतु वरेण्या ।।

(2) मोक्षदा :

ध्यायन्ति यां सहृदया हृदये प्रभाते गायन्ति यां सुकवयो लकितैर्वचोभिः ।
यां योगिनः सुहृदये परिशीलयन्ति तां मोक्षदां भगवतीं शरणं प्रपद्ये ।।

(3) दुर्गा :

शैलात्मजा कमलभूषितहंसयाना दुर्गा च दुर्गतिहरा भवनौ सुतारा ।
नारायणेन सुकृतैः स्मृतनामधेया विघ्नान्निवारयतु द्वादशषड् भुजाढ्या ॥

(4) वरदा :

हे वासुदेवसहजे! प्रतार्तिहर्त्रि ! हे नन्दगोपजयदे ! वसुदेवनीते ! ।
हे कंसराजदलिनि! श्रितव्योम मार्गे ! देवैस्तुते ! भगवति ! वरदे नमोऽस्तु ॥

(5) विन्ध्यवासिनी :

श्रीनीलकण्ठस्य हृतार्धकाया पद्मे सहस्रे धृतपद्मपादा ।
योगीन्द्रवर्यैर्विहितप्रणामा शैलात्मजा विन्ध्यनिवासिनी सा ॥

(6) शैलपुत्री :

पूर्णेन्दुवक्त्रा शरदिन्दुशुभ्रा भोगेन्द्रहारा नवद्विभुजाढ्या ।
सिंहाधिरूढा सुविशालनेत्रा सा शैलपुत्री भवतु प्रसन्ना ॥

(7) वेदमाता :

या षट् सरोजे च कृताधिवासा तारं जपन्ती प्रणवं प्रमोदात् ।
सार्धत्रिवृत्या च समुल्लसन्ती सा वेदमाता भवतु प्रसन्ना ।

(8) शारदा :

या चन्द्रभाला कमलासने स्वे विन्यस्य पादौ धृतकोणहस्ता ।
कुक्षौ दधाना च सुशुभ्रवीणा सा शारदा नो वरदा सदास्तु ॥

(9) पद्मधारिणी :

कुमारमाता द्विरदाननार्चिता शब्दात्मिका गद्यपदैरुदीरिता ।
उद्गीथबीजा प्रणवस्वरूपिणी सा पद्महस्ता भवतु प्रसन्ना ॥

10) (1) गायत्री (2) मोक्षदा (3) दुर्गा, ( ) वरदा (5) विन्ध्यवासिनो ।
(6) शैलजा (7) वेदमाता च, (8) शारदा (9) पद्मधारिणी ।

(11) नवद्वारमयेहर्म्ये, गीयतेऽहर्निशं बुधैः ।
हंसीवहंस सहगा, खेचरीखगगामिनी ॥

(12मूलाधाराद्विधेरन्ध्रे, संस्थिता कमलासने ।
नवभिर्गीयते पद्यैर्नवदुर्गाभयापहा ।

॥ समाप्तम् ॥

विनीतः जगत् रविः

ओं

(गंगावतारः)

रामनिकुञ्जगामिनी

(ट)

१ स्मारं स्मारं जनिमृतिभयं जातनिर्वेदवृत्ति
ध्यायं ध्यायं पशुपतिमुमाकान्तमन्तर्निषन्नम् ।
पायं पायं सपदि परमानन्दपीयूषधारां
भूयो भूयो निजगुरुपदम्बोजयुग्मं नमामि ॥

२ गगापूरप्रचलितजटासृस्तभोगेन्द्रभीता
मालिङ्गन्तीमचलतनयां सस्मितंवीक्षमानः ।
लीलापाङ्गैः प्रणतजनता नन्दयञ्चन्द्रमौलि
र्मोहध्वान्तं हरतु परमानन्दमूर्तिश्शिवो नः ॥

३ कमण्डलौ या कमलासनेन समानिता पूर्वमपूर्वतोया ।
त्रिविक्रमे विष्णुपदारबिन्दं संपूज्य याता हरमौलिभागम् ॥

४ भगीरथः सागरगान्स्वपितृनुद्धर्तु कामश्शिव सन्निधौ सः
आराधयामास सरिद्वरां तां हिमाद्रिदेशे पितृमुक्तिमत्यै ॥

५ संतुष्टचित्तस्य शिवस्यमौलेर्विनिर्गता पुण्यजला त्रिमार्गैः ।
मन्दाकिनी स्वर्गपथानुगामिनी भागीरथी भारतपावनी सदा ॥

६ पातालगा भोगवती यशस्विनी या सप्तधा सप्तसरोवरे स्थिता ।
संपूजिताभूदृषिभिस्तुसप्तभिः सापातु नो रामनिकुञ्जगामिनी ॥

७ कूर्मासनस्था मृगशावकाक्षी, चतुर्भुजा शोभितश्वेतवस्त्रा ।
धृताक्षमाला घटपद्ममुद्रा, दृष्टा मया रामनिकुञ्जगा सा ॥

८ भागीरथी पूतजला त्रितापहा, या भारतेभ्यो जयदायिनी सदा ।
संपूजिता भारतवासिभिर्मुदा, सा मेऽस्तु चान्ते शिवधाम दायिनी ॥

९ सदा पूता गंगा वितरति मुहुर्दर्शनसुखं
हिमाद्रेः सञ्जाता भरतविपिने सिञ्चति तरून् ।
मयादृष्टा सैषा प्रवहति सदा खण्डितगतिः
स्वदेशस्य स्नेहं प्रकटयति मुदा स्नेहपयसा ॥

१० हिमाद्रेर्निर्गत्य प्रविशति वनं तर्पणपरा
जनस्थाने लोकान्विविधबहुलाभं प्रकुरुते ।
त्रिवेणी तीर्थेऽस्मिन् हसति कुरुते नर्तनमपि
जलोर्मीणां नृत्यं सुखकरमहो सागरजले ॥

११ कृत: कुञ्जे वास: परमसुखदो रामकृपया
प्रवृद्धोऽस्यां स्नेह: सुरसरिति मे रामदयया ।
इयं गंगा मातु: प्रकटयति रागं प्रतिदिनं
चिताभस्म त्याज्यं सुरसरिति मेऽतो मृतिपरम् ॥

१२ विरिञ्चिपाण्यब्जविनिर्गता सा, पदब्जपूता गरुडासनस्य ।
अलंकृता मूर्ध्नि सदाशिवेन, पुण्या पताका सगरात्मजानाम् ॥

१३ गंगा नदी पूतजला त्रिमार्गगा, मन्दाकिनी भोगवती च जाह्नवी ।
विरिञ्चिनारायणरुद्रपूजिता, स्वर्गापवर्गाभयदा सुधा सृवा ॥

१४ सत्सङ्गलाभं शिवपादपूजां, माघेऽसिते धर्मतिथौ समाप्य ।
द्विजो जगन्नाथस्वनामधन्यस्तृप्तिं परामाप सुकुञ्ज भृङ्ग: ॥

१५ गंगा गीता च गायत्री, त्रिवर्गफलदायिनी ।
तनौ वाण्यां हृदि स्फीता, जगदानन्ददा भवेत् ॥

१६ धूम्रपानं परित्यज्य, बलभद्रप्रचोदित: ।
जीवन्मुक्तो जगन्नाथो, रामकुञ्जे बभूव ह ॥

राधाकान्त, सुदर्शनात्मजजगन्नाथेन संपादितो
नानाछन्दमय: सुरागभरितो निर्वाणवन्धश्शिव:
सोऽयं सज्जनमानसेषु नितरां शर्मप्रदो मोक्षद: ।
भूयान्नो जयद: सदा शिवमय: कामप्रदो भारते ॥

(श्री शिवार्पणमस्तु)

समाप्तम्

दास:
जगत्० रवि:

ग्रन्थकर्ता के अन्य प्रकाशन

		मूल्य
१.	पारिजात मञ्जरी	५.००
२.	विनायकवल्लभा	०.५०
३.	नवदुर्गा	०.२५
४.	गंगावतरण	०.२५
५.	श्री रहीमजगन्नीतिशतकम्	२.२५
६.	शिवनिर्वाण शतकम्	२.२५

—

पुस्तकें मिलने का पता :-

जगन्नाथ रिवू शास्त्री
भट्टयार आलीकदल,
श्रीनगर—२
काश्मीर